ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒: ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## द्वितीय काण्डे – तृतीय प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 1.0 dated August 31, 2021.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. No corrections found . Further , no corrections found and reported till October 15, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated July 31, 2018 |
| 2nd | Version Number | 0.0 dated May 31, 2019 |
| 3rd | Version Number | 1.0 dated Aug 31, 2021 |

# Table of Contents

2. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ....................................4

2.3 द्वितीय काण्डे तृतीय प्रश्नः – इष्टिविधानं..................................4

================================

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## 2.कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 2.3 द्वितीय काण्डे तृतीय प्रश्नः – इष्टिविधानं

**T.S.2.3.1.1 - Kramam**

आदित्येभ्यो भुवद्वद्भ्यः । भुवद्वद्भ्य श्चरुम् । भुवद्वद्भ्य इति भुवद्वत् – भ्यः । चरुम् निः । निर् वपेत् । वपेद् भूतिकामः । भूतिकाम आदित्याः । भूतिकाम इति भूति – कामः । आदित्या वै । वा एतम् । एतम् भूत्यै । भूत्यै प्रति । प्रति नुदन्ते । नुदन्ते यः । योऽलम् । अलम् भूत्यै । भूत्यै सन्न् । सन् भूतिम् । भूतिम् न । न प्राप्नोति । प्राप्नोत्यादित्यान् । प्राप्नोतीति प्र – आप्नोति । आदित्यानेव । एव भुवद्वतः । भुवद्वतः स्वेन । भुवद्वत इति भुवत् – वतः । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति ते । त एव । एवैनम् । एनम् भूतिम् । भूतिम् गमयन्ति । गमयन्ति भवति । भवत्येव । एवादित्येभ्यः । आदित्येभ्यो धारयद्वद्भ्यः । धारयद्वद्भ्य श्चरुम् ।

धारयद्वद्भ्य इति धारयद्वत् – भ्यः । चरुम् निः । निर् वपेत् ।
वपेदपरुद्धः । अपरुद्धो वा । अपरुद्ध इत्यप – रुद्धः ।
वा ऽपरुद्ध्यमानः । अपरुद्ध्यमानो वा । अपरुद्ध्यमान
इत्यप – रुद्ध्यमानः । वा ऽऽदित्याः । आदित्या वै ।
वा अपरोद्धारः । अपरोद्धार आदित्याः । अपरोद्धार इत्यप–रोद्धारः ।
आदित्या अवगमयितारः । अवगमयितार आदित्यान् । अवगमयितार
इत्यव – गमयितारः । आदित्यानेव । एव धारयद्वतः ।
धारयद्वतः स्वेन । धारयद्वत इति धारयत् – वतः । **1 (50/61)**

**T.S.2.3.1.2 - Kramam**

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति ते । त एव । एवैनम् । एनं ँविशि ।
विशि दाध्रति । दाध्रत्यनपरुद्ध्यः । अनपरुद्ध्यो भवति ।
अनपरुद्ध्य इत्यनप – रुद्ध्यः । भवत्यदिते । अदितेऽनु ।
अनु मन्यस्व । मन्यस्वेति । इत्यपरुद्ध्यमानः । अपरुद्ध्यमानोऽस्य ।
अपरुद्ध्यमान इत्यप – रुद्ध्यमानः । अस्य पदम् । पदमा ।
आ ददीत । ददीतेयम् । इयं ँवै । वा अदितिः । अदितिरियम् ।

इयमेव । एवास्मै । अस्मै राज्यम् । राज्यमनु । अनुमन्यते ।

मन्यते सत्या । सत्याऽऽशीः । आशीरिति । आशीरित्या – शीः ।

इत्याह । आह सत्याम् । सत्यामेव । एवाशिषम् । आशिषम् कुरुते ।

आशिषमित्या – शिषम् । कुरुत इह । इह मनः । मन इति ।

इत्याह । आह प्रजाः । प्रजा एव । प्रजा इति प्र – जाः । एवास्मै ।

अस्मै समनसः । समनसः करोति । समनस इति स – मनसः ।

करोत्युप । उप प्र । प्रेत । इत मरुतः ।

मरुतः सुदानवः । **2 (50/57)**

**<u>T.S.2.3.1.3 - Kramam</u>**

सुदानव एना । सुदानव इति सु – दानवः । एना विश्पतिना ।

विश्पतिना ऽभि । अभ्यमुम् । अमुꣳ राजानम् । राजानमिति ।

इत्याह । आह मारुती । मारुती वै । वै विट् । विड् ज्येष्ठः ।

ज्येष्ठो विश्पतिः । विश्पतिर् विशा । विशैव । एवैनम् ।

एनꣳ राष्ट्रेण । राष्ट्रेण सम् । समर्द्धयति । अर्द्धयति यः ।

यः परस्तात् । परस्ताद् ग्राम्यवादी । ग्राम्यवादी स्यात् । ग्राम्यवादीति

ग्राम्य – वादी । स्यात् तस्य । तस्य गृहात् । गृहाद् व्रीहीन् ।

व्रीहीना । आ हरेत् । हरेच्छुक्लान् । शुक्लाꣳश्च । च कृष्णान् ।
कृष्णाꣳश्च । च वि । वि चिनुयात् । चिनुयाद् ये । ये शुक्लाः ।
शुक्लाः स्युः । स्यु स्तम् । तमादित्यम् । आदित्यम् चरुम् ।
चरुम् निः । निर् वपेत् । वपेदादित्या । आदित्या वै । वै देवतया ।
देवतया विट् । विड् विशम् । विशमेव । एवाव । अव गच्छति ।
गच्छत्यवगता । **3 (50/52)**

**T.S.2.3.1.4 - Kramam**

अवगता ऽस्य । अवगतेत्यव – गता । अस्य विट् । विडनवगतम् ।
अनवगतꣳ राष्ट्रम् । अनवगतमित्यनव–गतम् । राष्ट्रमिति । इत्याहुः ।
आहुर् ये । ये कृष्णाः । कृष्णाः स्युः । स्यु स्तम् । तं ँवारुणम् ।
वारुणम् चरुम् । चरुम् निः । निर् वपेत् । वपेद् वारुणम् । वारुणं
ँवै । वै राष्ट्रम् । राष्ट्रमुभे । उभे एव । उभे इत्युभे । एव विशम् ।
विशम् च । च राष्ट्रम् । राष्ट्रम् च । चाव । अव गच्छति ।
गच्छति यदि । यदि न । नावगच्छेत् । अवगच्छेदिमम् ।
अवगच्छेदित्यव – गच्छेत् । इममहम् । अहमादित्येभ्यः ।
आदित्येभ्यो भागम् । भागम् निः । निर् वपामि । वपाम्या ।

आऽमुष्मात् । अमुष्मादमुष्यै । अमुष्यै विशः । विशो ऽवगन्तोः ।
अवगन्तोरिति । अवगन्तोरित्यव – गन्तोः । इति निः । निर् वपेत् ।
वपेदादित्याः । आदित्या एव । एवैनम् । एनम् भागधेयम् ।
भागधेयम् प्रेप्सन्तः । भागधेयमिति भाग – धेयम् ।
प्रेप्सन्तो विशम् । प्रेप्सन्त इति प्र – ईप्सन्तः । विशमव ।
अव गमयन्ति । **4** (**50/57**)

**<u>T.S.2.3.1.5 - Kramam</u>**

गमयन्ति यदि । यदि न । नावगच्छेत् । अवगच्छेदाश्वत्थान् ।
अवगच्छेदित्यव–गच्छेत् । आश्वत्थान् मयूखान् । मयूखान्थ् सप्त ।
सप्त मद्ध्यमेषायाम् । मद्ध्यमेषायामुप । मद्ध्यमेषायामिति
मद्ध्यम – ईषायाम् । उप हन्यात् । हन्यादिदम् । इदमहम् ।
अहमादित्यान् । आदित्यान् बद्ध्नामि । बद्ध्नाम्या । आऽमुष्मात् ।
अमुष्मादमुष्यै । अमुष्यै विशः । विशोऽवगन्तोः । अवगन्तोरिति ।
अवगन्तोरित्यव – गन्तोः । इत्यादित्याः । आदित्या एव । एवैनम् ।
एनम् बद्धवीराः । बद्धवीरा विशम् । बद्धवीरा इति बद्ध – वीराः ।
विशमव । अव गमयन्ति । गमयन्ति यदि । यदि न । नावगच्छेत् ।

अवगच्छेदेतम् । अवगच्छेदित्यव – गच्छेत् । एतमेव । एवादित्यम् ।
आदित्यं चरुम् । चरुम् निः । निर् वपेत् । वपेदिद्ध्मे । इद्ध्मे ऽपि ।
अपि मयूखान् । मयूखान्थ् सम् । सम् नह्येत् । नह्येदनपरुद्ध्यम् ।
अनपरुद्ध्यमेव । अनपरुद्ध्यमित्यनप – रुद्ध्यम् । एवाव ।
अव गच्छति । गच्छत्याश्वत्थाः । आश्वत्था भवन्ति ।
भवन्ति मरुताम् । मरुतां वै । वा एतत् । एतदोजः ( ) । ओजो यत् ।
यदश्वत्थः । अश्वत्थ ओजसा । ओजसैव । एव विशम् । विशमव ।
अव गच्छति । गच्छति सप्त । सप्त भवन्ति । भवन्ति सप्तगणाः ।
सप्तगणा वै । सप्तगणा इति सप्त – गणाः । वै मरुतः ।
मरुतो गणशः । गणश एव । गणश इति गण – शः । एव विशम् ।
विशमव । अव गच्छति । गच्छतीति गच्छति ॥ **5** (**68/76**)

*(धारयद्वतो–मरुतो–गच्छति–विशमवै–त–दष्टादश च) (A1)*

**T.S.2.3.2.1 - Kramam**

देवा वै । वै मृत्योः । मृत्योरबिभयुः । अबिभयुस्ते । ते प्रजापतिम् ।
प्रजापतिमुप । प्रजापतिमिति प्रजा – पतिम् । उपाधावन्न् ।
अधावन् तेभ्यः । तेभ्य एताम् । एताम् प्राजापत्याम् ।

प्राजापत्याꣳ शतकृष्णलाम् । प्राजापत्यामिति प्राजा – पत्याम् ।
शतकृष्णलाम् निः । शतकृष्णलामिति शत–कृष्णलाम् । निरवपत् ।
अवपत् तया । तयैव । एवैषु । एष्वमृतम् । अमृतमदधात् ।
अदधाद् यः । यो मृत्योः । मृत्योर् बिभीयात् । बिभीयात् तस्मै ।
तस्मा एताम् । एताम् प्राजापत्याम् । प्राजापत्याꣳ शतकृष्णलाम् ।
प्राजापत्यामिति प्राजा – पत्याम् । शतकृष्णलाम् निः ।
शतकृष्णलामिति शत–कृष्णलाम् । निर् वपेत् । वपेत् प्रजापतिम् ।
प्रजापतिमेव । प्रजापतिमिति प्रजा – पतिम् । एव स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन्नायुः ।
आयुर् दधाति । दधाति सर्वम् । सर्वमायुः । आयुरेति । एति
शतकृष्णला । शतकृष्णला भवति । शतकृष्णलेति शत – कृष्णला ।
भवति शतायुः । शतायुः पुरुषः । शतायुरिति शत – आयुः ।
पुरुषः शतेन्द्रियः । शतेन्द्रिय आयुषि । शतेन्द्रिय इति
शत – इन्द्रियः । आयुष्येव । एवेन्द्रिये । इन्द्रिये प्रति । **6 (50/60)**

**T.S.2.3.2.2 - Kramam**

प्रति तिष्ठति । तिष्ठति घृते । घृते भवति । भवत्यायुः । आयुर् वै ।
वै घृतम् । घृतममृतम् । अमृत॰ हिरण्यम् । हिरण्यमायुः । आयुश्च ।
चैव । एवास्मै । अस्मा अमृतम् । अमृतम् च । च समीची ।
समीची दधाति । समीची इति समीची । दधाति चत्वारिचत्वारि ।
चत्वारिचत्वारि कृष्णलानि । चत्वारिचत्वारीति चत्वारि – चत्वारि ।
कृष्णलान्यव । अव द्यति । द्यति चतुरवत्तस्य । चतुरवत्तस्याप्त्यै ।
चतुरवत्तस्येति चतुः – अवत्तस्य । आप्त्या एकधा । एकधा ब्रह्मणे ।
एकधेत्येक – धा । ब्रह्मण उप । उप हरति । हरत्येकधा । एकधैव ।
एकधेत्येक – धा । एव यजमाने । यजमान आयुः । आयुर् दधाति ।
दधात्यसौ । असावादित्यः । आदित्यो न । न वि । व्यरोचत ।
अरोचत तस्मै । तस्मै देवाः । देवाः प्रायश्चित्तिम् ।
प्रायश्चित्ति मैच्छन्न् । ऐच्छन् तस्मै । तस्मा एतम् । एत॰ सौर्यम् ।
सौर्यम् चरुम् । चरुम् निः । निरवपन्न् । अवपन् तेन । तेनैव ।
एवास्मिन्न् । अस्मिन् रुचम् । **7 (50/55)**

**T.S.2.3.2.3 - Kramam**

रुचमदधुः । अदधुर् यः । यो ब्रह्मवर्चसकामः । ब्रह्मवर्चसकामः स्यात् । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस - कामः । स्यात् तस्मै । तस्मा एतम् । एत꣡ꣳ सौर्यम् । सौर्यम् चरुम् । चरुम् निः । निर् वपेत् । वपेदमुम् । अमुमेव । एवादित्यम् । आदित्य꣡ꣳ स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन । उप धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् । ब्रह्मवर्चसम् दधाति । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । दधाति ब्रह्मवर्चसी । ब्रह्मवर्चस्येव । ब्रह्मवर्चसीति ब्रह्म - वर्चसी । एव भवति । भवत्युभयतः । उभयतो रुक्मौ । रुक्मौ भवतः । भवत उभयतः । उभयत एव । एवास्मिन्न् । अस्मिन् रुचम् । रुचम् दधाति । दधाति प्रयाजेप्रयाजे । प्रयाजेप्रयाजे कृष्णलम् । प्रयाजेप्रयाज इति प्रयाजे - प्रयाजे । कृष्णलम् जुहोति । जुहोति दिग्भ्यः । दिग्भ्य एव । दिग्भ्य इति दिक् - भ्यः । एवास्मै । अस्मै ब्रह्मवर्चसम् । ब्रह्मवर्चसमव । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् ।

अव रुन्धे । रुन्ध आग्नेयम् । आग्नेयमष्टाकपालम् । अष्टाकपालम्

निः । अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेथ् सावित्रम् ।

सावित्रम् द्वादशकपालम् । द्वादशकपालम् भूम्यै ।

द्वादशकपालमिति द्वादश – कपालम् । भूम्यै चरुम् । **8 (50/59)**

**T.S.2.3.2.4 - Kramam**

चरुं ँयः । यः कामयेत । कामयेत हिरण्यम् । हिरण्यं ँविन्देय ।

विन्देय हिरण्यम् । हिरण्यम् मा । मोप । उप नमेत् । नमेदिति ।

इति यत् । यदाग्नेयः । आग्नेयो भवति । भवत्याग्नेयम् ।

आग्नेयं ँवै । वै हिरण्यम् । हिरण्यं ँयस्य । यस्यैव । एव हिरण्यम् ।

हिरण्यम् तेन । तेनैव । एवैनत् । एनद् विन्दते । विन्दते सावित्रः ।

सावित्रो भवति । भवति सवितृप्रसूतः । सवितृप्रसूत एव ।

सवितृप्रसूत इति सवितृ – प्रसूतः । एवैनत् । एनद् विन्दते ।

विन्दते भूम्यै । भूम्यै चरुः । चरुर् भवति । भवत्यस्याम् ।

अस्यामेव । एवैनत् । एनद् विन्दते । विन्दत उप । उपैनम् ।

एनꣳ हिरण्यम् । हिरण्यम् नमति । नमति वि । वि वै । वा एषः ।

एष इन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येणर्द्ध्यते । ऋद्ध्यते यः ।
यो हिरण्यम् । हिरण्यं ँविन्दते । विन्दत एताम् । एतामेव । **9 (50/51)**

**T.S.2.3.2.5 - Kramam**

एव निः । निर् वपेत् । वपेद्धिरण्यम् । हिरण्यं ँवित्वा । वित्वा न ।
नेन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येण वि । व्यृद्ध्यते ।
ऋद्ध्यत एताम् । एतामेव । एव निः । निर् वपेत् । वपेद् यस्य ।
यस्य हिरण्यम् । हिरण्यम् नश्येत् । नश्येद् यत् । यदाग्नेयः ।
आग्नेयो भवति । भवत्याग्नेयम् । आग्नेयं ँवै । वै हिरण्यम् ।
हिरण्यं ँयस्य । यस्यैव । एव हिरण्यम् । हिरण्यम् तेन । तेनैव ।
एवैनत् । एनद् विन्दति । विन्दति सावित्रः । सावित्रो भवति ।
भवति सवितृप्रसूतः । सवितृप्रसूत एव ।
सवितृप्रसूत इति सवितृ - प्रसूतः । एवैनत् । एनद् विन्दति ।
विन्दति भूम्यै । भूम्यै चरुः । चरुर् भवति । भवत्यस्याम् ।
अस्यां ँवै । वा एतत् । एतन्नश्यति । नश्यति यत् । यन्नश्यति ।
नश्यत्यस्याम् । अस्यामेव । एवैनत् । एनद् विन्दति । विन्दतीन्द्रः ।
इन्द्र स्त्वष्टुः । **10 (50/51)**

**T.S.2.3.2.6 - Kramam**

त्वष्टुः सोमम् । सोममभीषहा । अभीषहा ऽपिबत् ।
अभीषहेत्यभि – सहा । अपिबथ् सः । स विष्वङ्ङ् । विष्वङ् वि ।
व्यार्च्छत् । आर्च्छथ् सः । स इन्द्रियेण । इन्द्रियेण सोमपीथेन ।
सोमपीथेन वि । सोमपीथेनेति सोम – पीथेन । व्यार्द्ध्यत ।
आर्द्ध्यत सः । स यत् । यदूर्द्ध्वम् । ऊर्द्ध्वमुदवमीत् ।
उदवमीत् ते । उदवमीदित्युत् – अवमीत् । ते श्यामाकाः ।
श्यामाका अभवन्न् । अभवन्थ् सः । स प्रजापतिम् । प्रजापतिमुप ।
प्रजापतिमिति प्रजा – पतिम् । उपाधावत् । अधावत् तस्मै ।
तस्मा एतम् । एतꣳ सोमेन्द्रम् । सोमेन्द्रꣳ श्यामाकम् । श्यामाकम्
चरुम् । चरुम् निः । निरवपत् । अवपत् तेन । तेनैव । एवास्मिन्न् ।
अस्मिन्निन्द्रियम् । इन्द्रियꣳ सोमपीथम् । सोमपीथमदधात् ।
सोमपीथमिति सोम – पीथम् । अदधाद् वि । वि वै । वा एषः ।
एष इन्द्रियेण । इन्द्रियेण सोमपीथेन । सोमपीथेनर्द्ध्यते ।
सोमपीथेनेति सोम – पीथेन । ऋद्ध्यते यः । यः सोमम् ।
सोमं ँवमिति । वमिति यः । यः सोमवामी । सोमवामी स्यात् ।

सोमवामीति सोम - वामी । स्यात् तस्मै ।

तस्मा एतम् । 11 (50/57)

**T.S.2.3.2.7 - Kramam**

एत॒ꣳ सोमेन्द्रम् । सोमेन्द्र॒ꣳ श्यामाकम् । श्यामाकम् चरुम् ।

चरुम् निः । निर् वपेत् । वपेथ् सोमम् । सोमम् च । चैव ।

एवेन्द्रम् । इन्द्रम् च । च स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग - धेयेन । उप धावति । धावति तौ । तावेव ।

एवास्मिन्न् । अस्मिन्निन्द्रियम् । इन्द्रिय॒ꣳ सोमपीथम् । सोमपीथम्

धत्तः । सोमपीथमिति सोम - पीथम् । धत्तो न । नेन्द्रियेण ।

इन्द्रियेण सोमपीथेन । सोमपीथेन वि ।

सोमपीथेनेति सोम - पीथेन । व्यृध्यते । ऋद्ध्यते यत् ।

यथ् सौम्यः । सौम्यो भवति । भवति सोमपीथम् । सोमपीथमेव ।

सोमपीथमिति सोम - पीथम् । एवाव । अव रुन्धे । रुन्धे यत् ।

यदैन्द्रः । ऐन्द्रो भवति । भवतीन्द्रियम् । इन्द्रियं ँवै । वै सोमपीथः ।

सोमपीथ इन्द्रियम् । सोमपीथ इति सोम - पीथः । इन्द्रियमेव ।

एव सोमपीथम् । सोमपीथमव । सोमपीथमिति सोम - पीथम् ।

अव रुन्धे । रुन्धे श्यामाकः । श्यामाको भवति । भवत्येषः ।

एष वाव । वाव सः । स सोमः । सोमः साक्षात् । **12** (**50/56**)

**T.S.2.3.2.8 - Kramam**

साक्षादेव । साक्षादिति स – अक्षात् । एव सोमपीथम् ।

सोमपीथमव । सोमपीथमिति सोम – पीथम् । अव रुन्धे ।

रुन्धे ऽग्नये । अग्नये दात्रे । दात्रे पुरोडाशम् ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेदिन्द्राय ।

इन्द्राय प्रदात्रे । प्रदात्रे पुरोडाशम् । प्रदात्र इति प्र – दात्रे ।

पुरोडाशमेकादशकपालम् । एकादशकपालम् पशुकामः ।

एकादशकपालमित्येकादश – कपालम् । पशुकामो ऽग्निः ।

पशुकाम इति पशु – कामः । अग्निरेव । एवास्मै । अस्मै पशून् ।

पशून् प्रजनयति । प्रजनयति वृद्धान् । प्रजनयतीति प्र – जनयति ।

वृद्धानिन्द्रः । इन्द्रः प्र । प्र यच्छति । यच्छति दधि । दधि मधु ।

मधु घृतम् । घृतमापः । अपो धानाः । धाना भवन्ति । भवन्त्येतत् ।

एतद् वै । वै पशूनाम् । पशूना७ं रूपम् । रूप७ं रूपेण । रूपेणैव ।

एव पशून् । पशूनव । अव रुन्धे । रुन्धे पञ्चगृहीतम् ।
पञ्चगृहीतम् भवति । पञ्चगृहीतमिति पञ्च – गृहीतम् । भवति
पाङ्क्ताः । पाङ्क्ता हि । हि पशवः । पशवो बहुरूपम् । बहुरूपम्
भवति । बहुरूपमिति बहु–रूपम् । भवति बहुरूपाः । बहुरूपा हि ।
बहुरूपा इति बहु – रूपाः । हि पशवः ( ) ।
पशवः समृद्ध्यै । **13 (50/60)**

**<u>T.S.2.3.2.9 - Kramam</u>**

समृद्ध्यै प्राजापत्यम् । समृद्ध्या इति सं – ऋद्ध्यै ।
प्राजापत्यम् भवति । प्राजापत्यमिति प्राजा – पत्यम् ।
भवति प्राजापत्याः । प्राजापत्या वै । प्राजापत्या इति प्राजा–पत्याः ।
वै पशवः । पशवः प्रजापतिः । प्रजापतिरेव । प्रजापतिरिति
प्रजा – पतिः । एवास्मै । अस्मै पशून् । पशून् प्र । प्र जनयति ।
जनयत्यात्मा । आत्मा वै । वै पुरुषस्य । पुरुषस्य मधु । मधु यत् ।
यन्मधु । मद्ध्वग्नौ । अग्नौ जुहोति । जुहोत्यात्मानम् । आत्मानमेव ।
एव तत् । तद् यजमानः । यजमानोऽग्नौ । अग्नौ प्र । प्र दधाति ।
दधाति पङ्क्त्यौ । पङ्क्त्यौ याज्यानुवाक्ये । याज्यानुवाक्ये भवतः ।

याज्यानुवाक्ये इति याज्या – अनुवाक्ये । भवतः पाङ्क्तः ।
पाङ्क्तः पुरुषः । पुरुषः पाङ्क्ताः । पाङ्क्ताः पशवः ।
पशव आत्मानम् । आत्मानमेव । एव मृत्योः । मृत्योर् निष्क्रीय ।
निष्क्रीय पशून् । निष्क्रीयेति निः – क्रीय । पशूनव । अव रुन्धे ।
रुन्ध इति रुन्धे ॥ **14** (**41/47**)

*(इन्द्रिये – ऽस्मिन् – भूम्या – एता – मिन्द्रः – स्यात् तस्मै – सोमो – बहु रूपा हि पशव – एकचत्वारि॑ँशच्च ) (A2)*

**T.S.2.3.3.1 - Kramam**

देवा वै । वै सत्रम् । सत्रमासत । आसतर्द्धिपरिमितम् ।
ऋद्धिपरिमितम् ँ यशस्कामाः । ऋद्धिपरिमितमित्यृद्धि – परिमितम् ।
यशस्कामास्तेषाम् । यशस्कामा इति यशः – कामाः ।
तेषा॑ँ सोमम् । सोम॑ँ राजानम् । राजानं ँ यशः । यश आर्च्छत् ।
आर्च्छथ् सः । स गिरिम् । गिरिमुत् । उदैत् । ऐत् तम् । तमग्निः ।
अग्निरनु । अनूत् । उदैत् । ऐत् तौ । तावग्नीषोमौ । अग्नीषोमौ
सम् । अग्नीषोमावित्यग्नी – सोमौ । समभवताम् । अभवताम् तौ ।

तावि॑न्द्रः । इन्द्रो॑ य॒ज्ञवि॑भ्रष्टः । य॒ज्ञवि॑भ्र॒ष्टोऽनु॑ । य॒ज्ञवि॑भ्र॒ष्ट इति॑

य॒ज्ञ - वि॒भ्र॒ष्टः॒ । अनु॒ परा᳚ । परै᳚त् । ऐ॒त् तौ । ताव॑ब्रवीत् । अ॒ब्र॒वी॒द्

या॒जय॑तम् । या॒जय॒॑तम् मा । मेति॑ । इ॒ति तस्मै᳚ । तस्मा॑ ए॒ताम् ।

ए॒तामि॒ष्टिम्᳚ । इ॒ष्टि॒म् निः । निर॑वपताम् । अ॒व॒प॒ता॒मा॒ग्ने॒यम् ।

आ॒ग्ने॒यम॒ष्टाक॑पालम् । अ॒ष्टाक॑पालमै॒न्द्रम् ।

अ॒ष्टाक॑पा॒लमि॒त्य॒ष्टा - क॒पा॒ल॒म् । ऐ॒न्द्रमेका॑दशकपालम् ।

एका॑दशकपालꣳ सौ॒म्यम् ।

एका॑दशकपा॒लमि॒त्येका॑दश - क॒पा॒ल॒म् । सौ॒म्यम् च॒रुम् ।

च॒रुम् तया᳚ । तयै॒व । ए॒वास्मि॑न्न् । अ॒स्मि॒न् तेजः॑ ।

तेज॑ इ॒न्द्रि॒यम् । **15 (50/56)**

**<u>T.S.2.3.3.2 - Kramam</u>**

इ॒न्द्रि॒यम् ब्र॑ह्मवर्च॒सम् । ब्र॒ह्म॒व॒र्च॒सम॑धत्ताम् । ब्र॒ह्म॒व॒र्च॒समिति॑

ब्रह्म-व॒र्च॒सम् । अ॒ध॒त्ताꣳ॒ यः । यो य॒ज्ञवि॑भ्रष्टः । य॒ज्ञवि॑भ्र॒ष्टः स्यात् ।

य॒ज्ञवि॑भ्र॒ष्ट इति॑ य॒ज्ञ - वि॒भ्र॒ष्टः॒ । स्यात् तस्मै᳚ । तस्मा॑ ए॒ताम् ।

ए॒तामि॒ष्टिम्᳚ । इ॒ष्टि॒म् निः । निर् व॑पेत् । व॒पे॒दा॒ग्ने॒यम् ।

आ॒ग्ने॒यम॒ष्टाक॑पालम् । अ॒ष्टाक॑पालमै॒न्द्रम् ।

अष्टाकपालमित्यष्टा – कपालम् । ऐन्द्रमेकादशकपालम् ।

एकादशकपाल॒ँ सौम्यम् । एकादशकपालमित्येकादश–कपालम् ।

सौम्यम् चरुम् । चरुं ँयत् । यदाग्नेयः । आग्नेयो भवति ।

भवति तेजः । तेज एव । एवास्मिन्न् । अस्मिन् तेन । तेन दधाति ।

दधाति यत् । यद् ऐन्द्रः । ऐन्द्रो भवति । भवतीन्द्रियम् । इन्द्रियमेव ।

एवास्मिन्न् । अस्मिन् तेन । तेन दधाति । दधाति यत् । यथ् सौम्यः ।

सौम्यो ब्रह्मवर्चसम् । ब्रह्मवर्चसम् तेन ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । तेनाग्नेयस्य । आग्नेयस्य च ।

च सौम्यस्य । सौम्यस्य च । चैन्द्रे । ऐन्द्रे समाश्लेषयेत् ।

समाश्लेषयेत् तेजः । समाश्लेषयेदिति सं – आश्लेषयेत् । तेजश्च ।

चैव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् । ब्रह्मवर्चसम् च ।

ब्रह्मवर्चमिति ब्रह्म – वर्चसम् । च समीची । समिची दधाति ।

समीची इति समीची । **16** (**50/58**)

**T.S.2.3.3.3 - Kramam**

दधात्यग्नीषोमीयम् । अग्नीषोमीयमेकादशकपालम् ।

अग्नीषोमीयमित्यग्नी – सोमीयम् । एकादशकपालम् निः ।

एकादशकपालमित्येकादश – कपालम् । निर् वपेत् । वपेद् यम् ।

यम् कामः । कामो न । नोपनमेत् । उपनमेदाग्नेयः ।

उपनमेदित्युप – नमेत् । आग्नेयो वै । वै ब्राह्मणः । ब्राह्मणः सः ।

स सोमम् । सोमम् पिबति । पिबति स्वाम् । स्वामेव ।

एव देवताम् । देवता७ स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग – धेयेन । उप धावति । धावति सा । सैव ।

एवैनम् । एनम् कामेन । कामेन सम् । समर्द्धयति । अर्द्धयत्युप ।

उपैनम् । एनम् कामः । कामो नमति । नमत्यग्नीषोमीयम् ।

अग्नीषोमीयमष्टाकपालम् । अग्नीषोमीयमित्यग्नी – सोमीयम् ।

अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।

वपेद् ब्रह्मवर्चसकामः । ब्रह्मवर्चसकामो ऽग्नीषोमौ ।

ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः । अग्नीषोमावेव ।

अग्नीषोमावित्यग्नी – सोमौ । एव स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग–धेयेन । उप धावति । धावति तौ ।

तावेव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् । ब्रह्मवर्चसम् धत्तः ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । धत्तो ब्रह्मवर्चसी । ब्रह्मवर्चस्येव ।
ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव भवति । **17 (50/61)**

**T.S.2.3.3.4 - Kramam**

भवति यत् । यदष्टाकपालः । अष्टाकपालस्तेन । अष्टाकपाल
इत्यष्टा – कपालः । तेनाग्नेयः । आग्नेयो यत् । यच्छ्यामाकः ।
श्यामाक स्तेन । तेन सौम्यः । सौम्यः समृद्ध्यै ।
समृद्ध्यै सोमाय । समृद्ध्या इति सं – ऋद्ध्यै । सोमाय वाजिने ।
वाजिने श्यामाकम् । श्यामाकम् चरुम् । चरुम् निः । निर् वपेत् ।
वपेद् यः । यः क्लैब्यात् । क्लैब्याद् बिभीयात् । बिभीयाद् रेतः ।
रेतो हि । हि वै । वा एतस्मात् । एतस्माद् वाजिनम् ।
वाजिनमपक्रामति । अपक्रामत्यथ । अपक्रामतीत्यप – क्रामति ।
अथैषः । एष क्लैब्यात् । क्लैब्याद् बिभाय । बिभाय सोमम् ।
सोममेव । एव वाजिनम् । वाजिन७ स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।
धावति सः । स एव । एवास्मिन्न् । अस्मिन् रेतः । रेतो वाजिनम् ।
वाजिनम् दधाति । दधाति न । न क्लीबः । क्लीबो भवति ।

भवति ब्राह्मणस्पत्यम् । ब्राह्मणस्पत्यमेकादशकपालम् ।

ब्राह्मणस्पत्यमिति ब्राह्मणः–पत्यम् । एकादशकपालम् निः ।

एकादशकपालमित्येकादश – कपालम् । निर् वपेत् ।

वपेद् ग्रामकामः ( ) । ग्रामकामो ब्रह्मणः ।

ग्रामकाम इति ग्राम – कामः । **18 (50/57)**

**T.S.2.3.3.5 - Kramam**

ब्रह्मणस्पतिम् । पतिमेव । एव स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।

धावति सः । स एव । एवास्मै । अस्मै सजातान् । सजातान् प्र ।

सजातानिति स – जातान् । प्र यच्छति । यच्छति ग्रामी । ग्राम्येव ।

एव भवति । भवति गणवती । गणवती याज्यानुवाक्ये । गणवती इति

गण – वती । याज्यानुवाक्ये भवतः । याज्यानुवाक्ये इति

याज्या – अनुवाक्ये । भवतः सजातैः । सजातैरेव । सजातैरिति

स – जातैः । एवैनम् । एनम् गणवन्तम् । गणवन्तम् करोति ।

गणवन्तमिति गण – वन्तम् । करोत्येताम् । एतामेव । एव निः ।

निर् वपेत् । वपेद् यः । यः कामयेत । कामयेत ब्रह्मन्न् । ब्रह्मन्. विशम् । विशं ँवि । वि नाशयेयम् । नाशयेयमिति । इति मारुती । मारुती याज्यानुवाक्ये । मारुती इति मारुती । याज्यानुवाक्ये कुर्यात् । याज्यानुवाक्ये इति याज्या – अनुवाक्ये । कुर्याद् ब्रह्मन्न् । ब्रह्मन्नेव । एव विशम् । विशं ँवि । वि नाशयति । नाशयतीति नाशयति ॥ **19** (**43/51**)

***(तेजः – समीची – ब्रह्मवर्चस्येव – ग्रामकाम – स्त्रिचत्वारि॑ँशच्च) (A3)***

**T.S.2.3.4.1 - Kramam**

अर्यम्णे चरुम् । चरुम् निः । निर् वपेत् । वपेथ् सुवर्गकामः । सुवर्गकामो ऽसौ । सुवर्गकाम इति सुवर्ग – कामः । असौ वै । वा आदित्यः । आदित्यो ऽर्यमा । अर्यमा ऽर्यमणम् । अर्यमणमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् । एनꣳ सुवर्गम् । सुवर्गं ँलोकम् । सुवर्गमिति सुवः – गम् । लोकम् गमयति । गमयत्यर्यम्णे । अर्यम्णे चरुम् । चरुम् निः । निर् वपेत् ।

वपेद् यः । यः कामयेत । कामयेत दानकामाः । दानकामा मे । दानकामा इति दान – कामाः । मे प्रजाः । प्रजाः स्युः । प्रजा इति प्र – जाः । स्युरिति । इत्यसौ । असौ वै । वा आदित्यः । आदित्यो ऽर्यमा । अर्यमा यः । यः खलु । खलु वै । वै ददाति । ददाति सः । सो ऽर्यमा । अर्यमाऽर्यमणम् । अर्यमणमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव । एवास्मै । **20 (50/56)**

**T.S.2.3.4.2 - Kramam**

अस्मै दानकामाः । दानकामाः प्रजाः । दानकामा इति दान – कामाः । प्रजाः करोति । प्रजा इति प्र – जाः । करोति दानकामाः । दानकामा अस्मै । दानकामा इति दान–कामाः । अस्मै प्रजाः । प्रजा भवन्ति । प्रजा इति प्र – जाः । भवन्त्यर्यम्णे । अर्यम्णे चरुम् । चरुम् निः । निर् वपेत् । वपेद् यः । यः कामयेत । कामयेत स्वस्ति । स्वस्ति जनताम् । जनतामियाम् । इयामिति । इत्यसौ । असौ वै । वा आदित्यः । आदित्योऽर्यमा । अर्यमा ऽर्यमणम् । अर्यमणमेव । एव स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।

धावति सः । स एव । एवैनम् । एनम् तत् । तद् गमयति ।

गमयति यत्र । यत्र जिगमिषति । जिगमिषतीन्द्रः । इन्द्रो वै ।

वै देवानाम् । देवानामानुजावरः । आनुजावर आसीत् ।

आनुजावर इत्यानु – जावरः । आसीथ् सः । स प्रजापतिम् ।

प्रजापतिमुप । प्रजापतिमिति प्रजा – पतिम् । उपाधावत् ।

अधावत् तस्मै । तस्मा एतम् । एतमैन्द्रम् । ऐन्द्रमानुषूकम् ।

आनुषूकमेकादशकपालम् । आनुषूकमित्यानु – सूकम् ।

एकादशकपालम् निः । एकादशकपालमित्येकादश – कपालम् ।

निरवपत् । **21** (**50/59**)

**T.S.2.3.4.3 - Kramam**

अवपत् तेन । तेनैव । एवैनम् । एनमग्रम् । अग्रम् देवतानाम् ।

देवतानाम् परि । पर्यणयत् । अनयद् बुद्ध्नवती । बुद्ध्नवती

अग्रवती । बुद्ध्नवती इति बुद्ध्न – वती । अग्रवती याज्यानुवाक्ये ।

अग्रवती इत्यग्र – वती । याज्यानुवाक्ये अकरोत् । याज्यानुवाक्ये

इति याज्या–अनुवाक्ये । अकरोद् बुद्ध्नात् । बुद्ध्नादेव । एवैनम् ।

एनमग्रम् । अग्रम् परि । पर्यणयत् । अनयद् यः । यो राजन्यः ।
राजन्य आनुजावरः । आनुजावरः स्यात् ।
आनुजावर इत्यानु - जावरः । स्यात् तस्मै । तस्मा एतम् ।
एतमैन्द्रम् । ऐन्द्रमानुषूकम् । आनुषूकमेकादशकपालम् ।
आनुषूकमित्यानु - सूकम् । एकादशकापालम् निः ।
एकादशकपालमित्येकादश - कपालम् । निर् वपेत् । वपेदिन्द्रम् ।
इन्द्रमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति
भाग - धेयेन । उप धावति । धावति सः । स एव । एवैनम् ।
एनमग्रम् । अग्र৺ समानानाम् । समानानाम् परि । परि णयति । नयति
बुद्ध्नवती । बुद्ध्नवती अग्रवती । बुद्ध्नवती इति बुद्ध्न - वती ।
अग्रवती याज्यानुवाक्ये । अग्रवती इत्यग्र - वती । याज्यानुवाक्ये
भवतः । याज्यानुवाक्ये इति याज्या - अनुवाक्ये । भवतो बुद्ध्नात् ।
बुद्ध्नादेव । एवैनम् । एनमग्रम् । अग्रम् परि । **22 (50/60)**

**<u>T.S.2.3.4.4 - Kramam</u>**

परि णयति । नयत्यानुषूकः । आनुषूको भवति । आनुषूक
इत्यानु - सूकः । भवत्येषा । एषाहि । ह्येतस्य । एतस्य देवता ।

देवता यः । य आनुजावरः । आनुजावरः समृद्ध्यै । आनुजावर इत्यानु – जावरः । समृद्ध्यै यः । समृद्ध्या इति सं – ऋद्ध्यै । यो ब्राह्मणः । ब्राह्मण आनुजावरः । आनुजावरः स्यात् । आनुजावर इत्यानु – जावरः । स्यात् तस्मै । तस्मा एतम् । एतम् बार्.हस्पत्यम् । बार्.हस्पत्य मानुषूकम् । आनुषूकम् चरुम् । आनुषूकमित्यानु – सूकम् । चरुम् निः । निर् वपेत् । वपेद् बृहस्पतिम् । बृहस्पतिमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् । एनमग्रम् । अग्र॑ँ समानानाम् । समानानाम् परि । परि णयति । नयति बुद्ध्नवती । बुद्ध्नवती अग्रवती । बुद्ध्नवती इति बुद्ध्न – वती । अग्रवती याज्यानुवाक्ये । अग्रवती इत्यग्र – वती । याज्यानुवाक्ये भवतः । याज्यानुवाक्ये इति याज्या – अनुवाक्ये । भवतो बुद्ध्नात् । बुद्ध्नादेव । एवैनम् । एनमग्रम् । अग्रम् परि । परि णयति । नयत्यानुषूकः । आनुषूको भवति । आनुषूक इत्यानु – सूकः । भवत्येषा । एषा हि ।

ह्येतस्य ( ) । एतस्य देवता । देवता यः । य आनुजावरः ।

आनुजावरः समृद्ध्यै । आनुजावर इत्यानु – जावरः ।

समृद्ध्या इति सं – ऋद्ध्यै ॥ **23** (**54/65**)

*(एव – निर – ग्र – मेतस्य – चत्वारि च) (A4)*

**T.S.2.3.5.1 - Kramam**

प्रजापतेस्त्रयस्त्रि॒ꣳशत् । प्रजापतेरिति प्रजा – पतेः ।

त्रयस्त्रि॒ꣳशद् दुहितरः । त्रयस्त्रि॒ꣳशदिति त्रयः – त्रि॒ꣳशत् ।

दुहितर आसन्न् । आसन् ताः । ताः सोमाय । सोमाय राज्ञे ।

राज्ञे ऽददात् । अददात् तासाम् । तासा॒ꣳ रोहिणीम् । रोहिणीमुप ।

ऊपैत् । ऐत् ताः । ता ईर्ष्यन्तीः । ईर्ष्यन्तीः पुनः । पुनरगच्छन्न् ।

अगच्छन् ताः । ता अनु । अन्वैत् । ऐत् ताः । ताः पुनः ।

पुनरयाचत । अयाचत ताः । ता अस्मै । अस्मै न । न पुनः ।

पुनरददात् । अददाथ् सः । सोऽब्रवीत् । अब्रवीदृतम् । ऋतममीष्व ।

अमीष्व यथा । यथा समावच्छः । समावच्छ उपैष्यामि । समावच्छ

इति समावत् – शः । उपैष्याम्यथ । उपैष्यामीत्युप – एष्यामि ।

अथ ते । ते पुनः । पुनर् दास्यामि । दास्यामीति । इति सः ।

स ऋतम् । ऋतमामीत् । आमीत् ताः । ता अस्मै । अस्मै पुनः ।
पुनरददात् । अददात् तासाम् । तासा॒ँ रोहिणीम् । रोहिणीमेव ।
एवोप । उपैत् । **24 (50/54)**

**T.S.2.3.5.2 - Kramam**

ऐत् तम् । तँ यक्ष्मः । यक्ष्म आर्छत् । आर्छद् राजानम् । राजानँ
यक्ष्मः । यक्ष्म आरत् । आरदिति । इति तत् । तद् राजयक्ष्मस्य ।
राजयक्ष्मस्य जन्म । राजयक्ष्मस्येति राज – यक्ष्मस्य । जन्म यत् ।
यत् पापीयान् । पापीयानभवत् । अभवत् तत् । तत् पापयक्ष्मस्य ।
पापयक्ष्मस्य यत् । पापयक्ष्मस्येति पाप – यक्ष्मस्य । यज्जायाभ्यः ।
जायाभ्यो ऽविन्दत् । अविन्दत् तत् । तज्जायेन्यस्य । जायेन्यस्य यः ।
य एवम् । एवमेतेषाम् । एतेषाँ यक्ष्माणाम् । यक्ष्माणाम् जन्म ।
जन्म वेद । वेद न । नैनम् । एनमेते । एते यक्ष्माः । यक्ष्मा विन्दन्ति ।
विन्दन्ति सः । स एताः । एता एव । एव नमस्यन्न् । नमस्यन्नुप ।
उपाधावत् । अधावत् ताः । ता अब्रुवन्न् । अब्रुवन् वरम् ।
वरँ वृणामहै । वृणामहै समावच्छः । समावच्छ एव ।

समावच्छ इति समावत् - शः । एव नः । न उप । उपायः ।
अय इति । इति तस्मै । तस्मा एतम् । एतमादित्यम् । **25** (**50/53**)

**T.S.2.3.5.3 - Kramam**

आदित्यम् चरुम् । चरुम् निः । निरवपन्न् । अवपन् तेन । तेनैव ।
एवैनम् । एनम् पापात् । पापाथ् स्रामात् । स्रामादमुञ्चन्न् ।
अमुञ्चन्. यः । यः पापयक्ष्मगृहीतः । पापयक्ष्मगृहीतः स्यात् ।
पापयक्ष्मगृहीत इति पापयक्ष्म - गृहीतः । स्यात् तस्मै । तस्मा
एतम् । एतमादित्यम् । आदित्यम् चरुम् । चरुम् निः । निर् वपेत् ।
वपेदादित्यान् । आदित्यानेव । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति ते ।
त एव । एवैनम् । एनम् पापात् । पापाथ् स्रामात् ।
स्रामान् मुञ्चन्ति । मुञ्चन्त्यमावास्यायाम् । अमावास्यायाम् निः ।
अमावास्यायामित्यमा - वास्यायाम् । निर् वपेत् । वपेदमुम् ।
अमुमेव । एवैनम् । एनमाप्यायमानम् । आप्यायमानमनु ।
आप्यायमानमित्या - प्यायमानम् । अन्वा । आ प्याययति ।
प्याययति नवोनवः । नवोनवो भवति । नवोनव इति नवः - नवः ।

भवति जायमानः । जायमान इति । इति पुरोनुवाक्या ।

पुरोनुवाक्या भवति । पुरोनुवाक्येति पुरः – अनुवाक्या ।

भवत्यायुः । आयुरेव । एवास्मिन्न् । अस्मिन् तया । तया दधाति ( ) ।

दधाति यम् । यमादित्याः । आदित्या अꣳशुम् । अꣳशुमाप्याययन्ति ।

आप्याययन्तीति । आप्याययन्तीत्या – प्याययन्ति । इति याज्या ।

याज्या । ऐव । एवैनम् । एनमेतया । एतया प्याययति ।

प्याययतीति प्याययति ॥ **26** (**63/70**)

*(एवोपै – त – मस्मिन् – त्रयोदशच) (A5)*

**T.S.2.3.6.1 - Kramam**

प्रजापतिर् देवेभ्यः । प्रजापतिरिति प्रजा – पतिः । देवेभ्योऽन्नाद्यम् ।

अन्नाद्यं ँव्यादिशत् । अन्नाद्यमित्यन्न – अद्यम् । व्यादिशथ् सः ।

व्यादिशदिति वि – आदिशत् । सो ऽब्रवीत् । अब्रवीद् यत् ।

यदिमान् । इमान् ँलोकान् । लोकानभि । अभ्यतिरिच्यातै ।

अतिरिच्यातै तत् । अतिरिच्याता इत्यति – रिच्यातै । तन्मम ।

ममासत् । असदिति । इति तत् । तदिमान् । इमान् ँलोकान् ।

लोकानभि । अभ्यति । अत्यरिच्यत । अरिच्यतेन्द्रम् ।

इन्द्र॒ ॒ राजानम् । राजान॒मिन्द्रम् । इन्द्रमधि॒राजम् । अ॒धि॒रा॒जमिन्द्रम् ।

अ॒धि॒रा॒जामित्यधि-रा॒जम् । इन्द्र॒ स्व॒राजानम् । स्व॒राजा॒नम् ततः ।

स्व॒राजा॒नमिति स्व - राजानम् । तत॒ो वै । वै सः । स इ॒मान् ।

इ॒मान् ँल्लो॒कान् । लो॒का॒ स्त्रे॒धा । त्रे॒धा ऽदुहत् । अ॒दु॒हत् तत् ।

तत् त्रि॒धातोः । त्रि॒धातो स्त्रिधातु॒त्वम् । त्रि॒धा॒तो॒रिति त्रि - धातोः ।

त्रि॒धा॒तु॒त्वं ँयम् । त्रि॒धा॒तु॒त्वमिति त्रिधातु - त्वम् । यम् का॒मयेत ।

का॒मयेतान्ना॒दः । अ॒न्ना॒दः स्यात् । अ॒न्ना॒द इत्यन्न-अ॒दः । स्या॒दिति ।

इ॒ति तस्मै । तस्मा ए॒तम् । ए॒तम् त्रि॒धातुम् । त्रि॒धा॒तुम् निः ।

त्रि॒धा॒तुमिति त्रि - धातुम् । निर् वपेत् । व॒पे॒दिन्द्राय । इन्द्रा॒य रा॒ज्ञे ।

राज्ञे पु॒रो॒डाशम् । पु॒रो॒डा॒श॒मेकादशकपालम् । **27 (50/60)**

**<u>T.S.2.3.6.2 - Kramam</u>**

एकादशकपाल॒मिन्द्राय । एकादशकपाल॒मित्येकादश - क॒पा॒ल॒म् ।

इन्द्रायाधि॒राजाय । अ॒धि॒रा॒जायेन्द्राय । अ॒धि॒रा॒जायेत्यधि - रा॒जाय ।

इन्द्राय स्व॒राज्ञे । स्व॒रा॒ज्ञे ऽयम् । स्व॒रा॒ज्ञ इति स्व-राज्ञे । अ॒यं ँवै ।

वा इन्द्रः । इन्द्र॒ो राजा । राजा॒ऽयम् । अ॒यमिन्द्रः । इन्द्रो ऽधिरा॒जः ।

अ॒धि॒रा॒जो ऽसौ । अ॒धि॒रा॒ज इत्यधि - रा॒जः । अ॒साविन्द्रः ।

इन्द्रः स्वराट् । स्वराडिमान् । स्वराडिति स्व – राट् । इमानेव ।
एव लोकान् । लोकान्थ् स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति ते । त एव ।
एवास्मै । अस्मा अन्नम् । अन्नम् प्र । प्र यच्छन्ति । यच्छन्त्यन्नादः ।
अन्नाद एव । अन्नाद इत्यन्न – अदः । एव भवति । भवति यथा ।
यथा वथ्सेन । वथ्सेन प्रत्ताम् । प्रत्ताम् गाम् । गाम् दुहे ।
दुह एवम् । एवमेव । एवेमान् । इमान् ँलोकान् । लोकान् प्रत्तान् ।
प्रत्तान् कामम् । काममन्नाद्यम् । अन्नाद्यम् दुहे ।
अन्नाद्यमित्यन्न – अद्यम् । दुह उत्तानेषु । उत्तानेषु कपालेषु ।
उत्तानेष्वित्युत् – तानेषु । कपालेष्वधि । अधि श्रयति ।
श्रयत्ययातयामत्वाय । अयातयामत्वाय त्रयः ।
अयातयामत्वायेत्ययातयाम – त्वाय । त्रयः पुरोडाशाः ।
पुरोडाशा भवन्ति । भवन्ति त्रयः ( ) । त्रय इमे । इमे लोकाः ।
लोका एषाम् । एषां ँलोकानाम् । लोकानामाप्त्यै । आप्त्या उत्तरउत्तरः ।
उत्तरउत्तरो ज्यायान् । उत्तरउत्तर इत्युत्तरः–उत्तरः । ज्यायान् भवति ।

भवत्येवम् । एवमिव । इव हि । हीमे । इमे लोकाः ।

लोकाः समृद्ध्यै । समृद्ध्यै सर्वेषाम् । समृद्ध्या इति सं–ऋद्ध्यै ।

सर्वेषामभिगमयन्न् । अभिगमयन्नव । अभिगमयन्नित्यभि – गमयन्न् ।

अव द्यति । द्यत्यछम्बट्कारम् । अछम्बट्कारं ँव्यत्यासम् ।

अछम्बट्कारमित्यछम्बट् – कारम् । व्यत्यासमनु ।

व्यत्यासमिति वि – अत्यासम् । अन्वाह । आहानिर्दाहाय ।

अनिर्दाहायेत्यनिः – दाहाय ॥ **28** (**76/91**)

*(पुरोडाशं – त्रयः – षड्विꣳशतिश्च) (A6)*

**T.S.2.3.7.1 - Kramam**

देवासुराः सम्ँयत्ताः । देवासुरा इति देव – असुराः । सम्ँयत्ता

आसन्न् । सम्ँयत्ता इति सं – यत्ताः । आसन् तान् । तान् देवान् ।

देवानसुराः । असुरा अजयन्न् । अजयन् ते । ते देवाः ।

देवाः पराजिग्यानाः । पराजिग्याना असुराणाम् । पराजिग्याना

इति परा – जिग्यानाः । असुराणां ँवैश्यम् । वैश्यमुप । उपायन्न् ।

आयन् तेभ्यः । तेभ्य इन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यमप ।

अपाक्रामत् । अक्रामत् तत् । तदिन्द्रः । इन्द्रोऽचायत् ।

अचायत् तत् । तदनु । अन्वप । अपाक्रामत् । अक्रामत् तत् ।
तदवरुधम् । अवरुधम् न । अवरुधमित्यव - रुधम् । नाशक्नोत् ।
अशक्नोत् तत् । तदस्मात् । अस्मादभ्यर्द्धः । अभ्यर्द्धो ऽचरत् ।
अभ्यर्द्ध इत्यभि - अर्द्धः । अचरथ् सः । स प्रजापतिम् ।
प्रजापतिमुप । प्रजापतिमिति प्रजा - पतिम् । उपाधावत् ।
अधावत् तम् । तमेतया । एतया सर्वपृष्ठया । सर्वपृष्ठया ऽयाजयत् ।
सर्वपृष्ठयेति सर्व - पृष्ठया । अयाजयत् तया । तयैव । एवास्मिन्न् ।
अस्मिन्निन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यमदधात् । अदधाद् यः ।
य इन्द्रियकामः । इन्द्रियकामो वीर्यकामः ।
इन्द्रियकाम इतीन्द्रिय - कामः । **29 (50/58)**

**T.S.2.3.7.2 - Kramam**

वीर्यकामः स्यात् । वीर्यकाम इति वीर्य - कामः । स्यात् तम् ।
तमेतया । एतया सर्वपृष्ठया । सर्वपृष्ठया याजयेत् । सर्वपृष्ठयेति
सर्व-पृष्ठया । याजयेदेताः । एता एव । एव देवताः । देवताः स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन ।
उप धावति । धावति ताः । ता एव । एवास्मिन्न् । अस्मिन्निन्द्रियम् ।

इन्द्रियं ँवीर्यम् । वीर्यम् दधति । दधति यत् । यदिन्द्राय । इन्द्राय
राथन्तराय । राथन्तराय निर्वपति । राथन्तरायेति राथं – तराय ।
निर्वपति यत् । निर्वपतीति निः – वपति । यदेव । एवाग्नेः ।
अग्नेस्तेजः । तेजस्तत् । तदेव । एवाव । अव रुन्धे । रुन्धे यत् ।
यदिन्द्राय । इन्द्राय बार्.हताय । बार्.हताय यत् । यदेव । एवेन्द्रस्य ।
इन्द्रस्य तेजः । तेजस्तत् । तदेव । एवाव । अव रुन्धे । रुन्धे यत् ।
यदिन्द्राय । इन्द्राय वैरूपाय । वैरूपाय यत् । यदेव । एव सवितुः ।
सवितुस्तेजः । तेजस्तत् । तदेव । **30** (**50/55**)

**T.S.2.3.7.3 - Kramam**

एवाव । अव रुन्धे । रुन्धे यत् । यदिन्द्राय । इन्द्राय वैराजाय ।
वैराजाय यत् । यदेव । एव धातुः । धातु स्तेजः । तेजस्तत् । तदेव ।
एवाव । अव रुन्धे । रुन्धे यत् । यदिन्द्राय । इन्द्राय शाक्वराय ।
शाक्वराय यत् । यदेव । एव मरुताम् । मरुताम् तेजः । तेज स्तत् ।
तदेव । एवाव । अव रुन्धे । रुन्धे यत् । यदिन्द्राय । इन्द्राय रैवताय ।
रैवताय यत् । यदेव । एव बृहस्पतेः । बृहस्पतेस्तेजः । तेजस्तत् ।
तदेव । एवाव । अव रुन्धे । रुन्ध एतावन्ति । एतावन्ति वै ।

वै तेजा॑ꣳसि । तेजा॑ꣳसि॒ तानि॑ । तान्ये॒व । ए॒वाव॑ । अव॑ रुन्धे ।

रु॒न्ध॒ उ॒त्ता॒ने॑षु । उ॒त्ता॒ने॑षु क॒पाले॑षु । उ॒त्ता॒नेष्वित्यु॑त् – ता॒ने॑षु ।

क॒पाले॒ष्वधि॑ । अधि॑ श्रयति । श्र॒य॒त्ययातयामत्वाय ।

